

THE

ABHINAVA-KÂDAMBARÎ

OF

DHUṆDIRÂJA

EDITED

With Sanskrit Notes

BY

NÂRÂYAṆA BÂLAKRISHṆA GODABOLE, B. A.

MARÂTHÎ TRANSLATOR, EDUCATIONAL DEPARTMENT,
POONA.

Second Revised Edition.

PRINTED AND PUBLISHED BY THE PROPRIETOR

OF THE NIRNAYA-SÂGARA PRESS.

BOMBAY:

1889.

Price 3 Annas.

(*Registered according to Act XXV. of 1867.*)
(All rights reserved by the Publisher.)

॥ श्रीः ॥

धुण्डिराजकविविरचिता

अभिनवकादम्बरी

नारायण बालकृष्ण गोडबोले

इत्यनेन

स्वकृतसंस्कृतटिपण्या युता संस्कृता ।

द्वितीयावृत्तिः ।

सा च

शाके १८११ वत्सरे

मुम्बय्यां

निर्णयसागरयन्त्रालयाधिपतिना मुद्रिता ।

मूल्यमाणक्त्रयम् ।

PREFACE

(TO THE FIRST EDITION.)

The following is an attempt not so much at distinction as at removing the difficulty which the candidates for the B. A. Examination labour under. It is more keenly felt when the second half is prescribed for the Examination. The difficulty I allude to is the want of a short abstract of Kâdambarî in a convenient form. The reader, unless he knows the connection, cannot easily get on with the second half. Besides the descriptive power of Bâṇabhatta at once strikes the reader and so puzzles him that he cannot follow him and the thread of the story is quite lost sight of. These pages will therefore serve to keep before his mind the whole plot. I have thus endeavoured to do my duty in offering this to the public since I came by a manuscript of it during my stay at Nasik ; and I will think myself amply rewarded by its wide perusal. I have added a list of personages occurring in Kâdambarî which will prove of great use to the reader. In fine, I beg to say that the errors that might have crept into these pages might be overlooked.

THE EDITOR.

PREFACE

(TO THE SECOND EDITION.)

It is nearly seventeen years since the appearance of the first edition of this small work. In this edition a short life of the author is added in Marâthî. Addition is made in the notes also. Errors and misprints have been removed. During this time the sweets of the poet's Sanskrit composition have been served before the Marâthî readers by Mr. G. R. Mogaré. An abstract of the Kâdambarî has also appeared in the Kâvyamâlâ, a very useful publication of the Nirṇaya-sâgara Press, under the name of the Kâdambarî-kathâ-sâra. This is an older work by Abhinanda, who, according to the editors of the Kâvyamâlâ, flourished in the Eighth century of the Christian era. Dhundirâja's work is an abstract of abstracts. It combines conciseness with fullness. There is no omission of any of the principal incidents of the story. It very properly omits the details only. A call for a second edition is a clear indication of a demand for the book. For many, nay most, of the corrections I am indebted to Mr. R. T. Patwardhan, Sanskrit Teacher, High School, Karâchi, who had the goodness to communicate with me and send me a list of misprints &c. The addition in the notes is also made at his suggestion. The work of carrying this edition through the press devolved solely I must say on Mr. K. P. Parab to whom my acknowledgements are due.

N. B. G.

LIST OF PERSONAGES OCCURRING IN THE KÂDAMBARÎ.

शूद्रक—King of Vidis'â (Chandrâpîda in his second birth.)

कुमारपालित—His minister.

मातङ्गक—A fowler.

जाबालि—A great sage with whom the parrot Vais'ampâyana passed his early days.

हारीत—His son.

तारापीड—King of Oujein, the father of Chandrâpîda.

विलासवती—His queen.

चन्द्रापीड—His son. (The moon on earth through the curse of Puṇḍarîka).

पत्रलेखा—The female attendant and favorite of the above. (Rohiṇî on earth).

शुकनास—The minister of Târâpîda.

मनोरमा—His wife.

वैशम्पायन—His son. A constant friend of Chandrâpîda. (Puṇḍarîka in his second birth). The same turned into a parrot through the curse of Mahâs'vetâ.

इन्द्रायुध—The horse of Chandrâpîda. (Kapinjala in his second birth). He assumes the form of a horse through a sage's curse.

श्वेतकेतु—A sage by whom Lakshmî had a son named Puṇḍarîka.

पुण्डरीक and कपिञ्जल—Young sages. Intimate friends. The former, through the curse of the moon, became Vais'ampâyana, and the latter, through the curse of a sage, became Indrâyudha. (*See Supra.*)

हंस and गौरी—Gandharvas. Parents of Mahás'vetâ.

महाश्वेता—Daughter of the above who had fallen in love with Puṇḍarîka, who died love-stricken.

तरलिका—Her female attendant.

चित्ररथ and मदिरा—Also Gandharvas. Parents of Kâdambarî.

कादम्बरी—Daughter of the above who fell in love with Chandrâpîda.

केयूरक—Her attendant (chamberlain).

मदलेखा—Her female attendant.

लक्ष्मी—Represented as a Châṇḍâlî who brought the parrot to King S'ûdraka. Puṇḍarîka's mother. (*See Supra.*)

प्रस्तावना.

ह्या पुस्तकाची प्रथमावृत्ति छापून काढल्यास सुमारें सत्रा वर्षें झालीं. कादंबरी ही कथानायिका असल्यावरून बाणभट्टाच्या कथेस कादंबरी हें नांव मिळालें. व हल्लीं लांबलचक गोष्टींस ह्मणजे ज्यांस इंग्रजींत 'नावेल' असें ह्मणतात तीस सामान्यतः कादंबरी हेंच नांव देतात. हा बाणभट्टाचा ग्रंथ पूर्वी फारसा प्रसिद्ध नव्हता. परंतु 'बाणोच्छिष्टं जगत्सर्वम्' ह्या उक्तीनें नांवाजलेल्या ह्या ग्रंथाचें पठन अलीकडे कॉलेजांतील सर्व विद्यार्थी करूं लागले आहेत. युनिव्हर्सिटीच्या परीक्षेस पूर्वभाग व उत्तरभाग आळीपाळीनें नेमलेले असत. उत्तरभाग असे तेव्हां पूर्वभागांतील कथा कळल्याशिवाय पुढील कथाभाग कळण्यास अडचण पडे. हल्लीं पूर्वभागांतील प्रथमार्ध व उत्तरार्ध असे परीक्षेस असतात तेव्हां उत्तरार्ध ज्या वर्षी असतें त्या वर्षी पूर्वार्धांत काय कथा आहे हें कळल्याशिवाय पुढची कथा समजण्यास अडचण पडते हें उघड आहे. ही अडचण स्वानुभवानें जाणून नाशकास असतांना वे. रा. रा. एकनाथ शास्त्री यांजकडे धुंडिराजकविकृत एक लेखी पुस्तक सन १८७२ सालीं आढळलें, त्यावरून शुद्ध करून त्या एकाच प्रतीवरून हें पुस्तक छापलें. त्या वेळेस पुस्तक काढण्याचें ज्ञान मुळींच नव्हतें ह्मणून केवळ उपयोगाकडे लक्ष देऊन हें पुस्तक प्रसिद्ध केलें. युनिव्हर्सिटीच्या विद्यार्थ्यांना ह्या पुस्तकाची जरूर आहेच परंतु एरवीं देखील व्युत्पत्तीकरतां काव्यनाटकादि साहित्यग्रंथ वाचणाऱ्या लोकांसही या पुस्तकाचा उपयोग होईल. ह्या पुस्तकाचें मराठी भाषांतर मुंबई एथील रा. रा. गंगाधर रामचंद्र मोगरे ह्यांनीं करून महाराष्ट्रभाषाभिज्ञांस ह्या कथेचा परिचय कांहीं दिवसांपूर्वी करून दिला आहे. अलीकडे निर्णयसागर

छापखान्याचे मालक हे जयपुरचे **पंडित दुर्गाप्रसाद** व रा. रा. **का. पां. परब** ह्यांच्या साह्यानें 'काव्यमाला' ह्मणून जें अत्युपयोगी मासिक पुस्तक काढीत असतात त्यांत गुदस्त (सन १८८८) सालीं 'कादंबरीकथासार' ह्या नांवानें एक सार छापलें आहे. हें प्राचीन आहे व खिस्तीशकाच्या ८ व्या शतकांत ह्मणजे बाणभट्टानंतर थोड्याच कालानें झालेल्या अभिनंदानें केलें आहे असें कविवृत्तांत प्रकाशक पंडितांनीं लिहिलें आहे. परंतु सारांत सार असा प्रकृत ग्रंथ आहे. ह्यांत कथेंतील मुख्य गोष्ट एकही न गाळतां थोडक्यांत सर्व गोष्टी आणल्या आहेत. हा या पुस्तकाचा विशेष आहे. संस्कृत पुस्तकें वाचणारे लोक थोडे ह्मणून असल्या पुस्तकांच्या प्रतींचा फारच थोडा खप असतो. तथापि ह्या पुस्तकाची द्वितीयावृत्ति काढण्याचा प्रसंग आला आहे ही आनंदाची गोष्ट आहे. ह्या आवृत्तींत प्रथमावृत्तींत न घातलेली कवीची संक्षिप्त माहिती दिली आहे. छापण्यांत वगैरे अशुद्धें राहिलीं होतीं तीं दुरुस्त केलीं आहेत. शेवटीं टिपांतही थोडी भर घातली आहे. ह्या दुरुस्तीचें व टिपांत भर घालण्याचें श्रेय रा. रा. **रामचंद्र त्रिंबक पटवर्धन,** कराची हायस्कुलाचे संस्कृत शिक्षक, ह्यांस आहे. ही आवृत्ति काढितांना वे. रा. रा. **विश्वनाथ शास्त्री जोशी** नाशिककर, ह्यांनीं बरीच मेहनत घेतली आहे. तथापि अपूर्णता हा दोष सर्व मानवकृतींत राहणारच. तरी 'त्यजन्ति शूर्पवद्दोषान्' ह्या प्रसिद्ध संस्कृत उक्तीकडे व 'कां न सदन बांधावें' ह्या प्रसिद्ध प्राकृतोक्तीकडे लक्ष देऊन हा ग्रंथ सर्व विद्याभिवृद्धीच्छु जनांपुढें पुनः ठेविला आहे.

ना. बा. गो.

पुणें, तारीख १ माहे जून सन १८८९ इसवी.

कादंबरींतील पात्रांची यादी.

शूद्रक—विदिशा नगरीचा राजा. (हाच पूर्वजन्मींचा तारापीडाचा पुत्र चंद्रापीड).

कुमारपालित—शूद्रकाचा मंत्री (प्रधान).

मातंगक—एक फांसेपारधी.

जाबालि—भूतभविष्यवर्तमानत्रिकालज्ञ महातपस्वी ऋषि. वैशंपायन शुक ह्याच्या आश्रमांत कांहीं दिवस राहिला होता.

हारीत—जाबालि ऋषीचा मुलगा तपस्वी.

तारापीड—उज्जनीचा राजा, चंद्रापीडाचा बाप.

विलासवती—तारापीडाची राणी.

चंद्रापीड—तारापीडाचा मुलगा. कथानायक. (पुंडरीक नांवाच्या ऋषिपुत्राच्या शापानें झालेला पृथ्वीवरला चंद्राचा अवतार).

पत्रलेखा—चंद्रापीडाची तांबूल देणारी दासी. (चंद्रानें पृथ्वीवर शापानें मनुष्यजन्म घेतल्यामुळें त्याच्या संनिध राहण्याकरतां आलेली रोहिणी).

शुकनास—तारापीडाचा मंत्री.

मनोरमा—शुकनासाची स्त्री.

वैशंपायन—शुकनासाचा मुलगा. चंद्रापीडाचा मित्र. (पूर्वजन्मींचा पुंडरीक नांवाचा ऋषिकुमार). हाच महाश्वेतेच्या शापानें पोपट झाला होता.

इंद्रायुध—चंद्रापीडाचा घोडा. (पूर्वजन्मीं पुंडरीकाचा मित्र कपिंजल). हा ऋषिशापानें घोडा झाला होता.

श्वेतकेतु—ऋषि. पुंडरीकाचा बाप. (या ऋषीपासून लक्ष्मीला पुंडरीक हा पुत्र झाला).

पुंडरीक—ऋषिपुत्र. श्वेतकेतूचा मुलगा. (हा चंद्राच्या शापानें शुकनासपुत्र वैशंपायन झाला).

कपिंजल—पुंडरीकाचा मित्र. ऋषिपुत्र. (ह्याला ऋषीच्या शापानें अश्वयोनि प्राप्त झाली व हा इंद्रायुध झाला).

हंस व गौरी—गंधर्वांचें जोडपें. महाश्वेतेचीं मातापितरें.

महाश्वेता—हंस व गौरी यांची कन्या. (हिचें प्रेम पुंडरीक ऋषिपुत्रावर जडलें होतें).

तरलिका—महाश्वेतेची दासी.

चित्ररथ व मदिरा—गंधर्व. कादंबरीचीं मातापितरें.

कादंबरी—चित्ररथमदिरेची मुलगी. (हिचें प्रेम चंद्रापीडावर जडलें होतें.) हीच या कथेची नायिका होय.

केयूरक—कादंबरीचा सेवक.

मदलेखा—कादंबरीची सखी.

लक्ष्मी—पुंडरीकाची आई. पुंडरीकास महाश्वेतेच्या शापानें शुकयोनि प्राप्त झाल्यावर त्याचें रक्षण करण्याकरितां हिनें त्यास पिंजऱ्यांत घालून त्यास घेऊन ती चांडालीचा वेष घेऊन शूद्रक राजाकडे घेऊन आली.

(कथा समजण्यास ही यादी फार उपयोगी आहे म्हणून जोडली आहे.)

धुंडिराज पिंगळे यांचें चरित्र.

सुमारें ७५ वर्षांपूर्वी श्रीत्र्यंबकेश्वरीं ह्मणजे जें गोदावरीचें उत्पत्तिस्थान ह्मणून नाशिकापासून सुमारें दहा कोशांवर आहे, तेथें धुंडिराज या नांवाचे विद्वान गृहस्थ होऊन गेले. हे देशस्थ ब्राह्मण होते. यांचें मुख्य राहण्याचें ठिकाण श्रीत्र्यंबकेश्वरच. यांचें लोकप्रसिद्ध व्यावहारिक नांव गडिभट्ट अप्पा व उपनांव पिंगळे. कवीनें या ग्रंथाचे आद्यन्तीं 'पिंगलकुलजोऽथ धुंडिराजाख्यः' असें स्वतःस ह्मणवून घेतलेलें आहे. यावरून हा पिंगल ह्मणून जो पूर्वी छंदःशास्त्राचा कर्ता होऊन गेला तद्वंशीय आहे किंवा मराठींत असणारें 'पिंगळे' हें उपनांव संस्कृत करून संस्कृतांत गोवून देतेसमयीं 'पिंगलकुलज' असें कवीनें सहजगत्या ह्मटलें असावें याजबद्दल बराच संशय आहे. व हा आमचा असलेला संशय संशयानेंच दूर व्हावा ह्मणजे चांगल्या हातानेंच, अर्थात् विद्वानांच्या, हें पृथक्त्वें सांगण्याची आवश्यकता नाहीं. तथापि स्पष्टप्रतिपत्त्यर्थ ह्मटलें असें समजावें. असो. धुंडिराज यांचें जन्म त्याच क्षेत्रीं शा० श० १६७५।७६ चे आंत बाहेर झालेलें असावें असें त्यांच्या चित्स्वरूपप्राप्त्यनुरोधानें व त्यांच्या त्यावेळेच्या वयाच्या ७०।७५ च्या मानानें आमचें पूर्वोक्त अनुमान बरेच प्रमाणानें प्रमादजनक होणार नाहीं अशी आह्मास मिळालेल्या माहितीवरून आमची पूर्ण खातरी आहे. असो. यांच्या तीर्थरूपाचें नांव चिंतामणभट्ट, मातुःश्रीचे नांव शिऊबाई, व पत्नीचें नांव येसू अथवा यशोदाबाई असें होतें. पंडितांचें परंपरागत भिक्षुकांचेंच घराणें. परंतु याच भिक्षावृत्त्युपजीविकुलांत धुंडिराज ह्म० गडिभट्ट अप्पासारखे कुशाग्रधिषणाग्रणी उत्पन्न झाल्यामुळें तें कुल अत्युज्ज्वलित झालें यांत ले-

शमात्र संदेह नाहीं. गडिभट्ट अप्पा हे महादीर्घोद्योगी होते. यामुळें त्यांस पोथ्या पाहण्यास व लेख लिहिण्यास दिवस पुरत नसत. अप्पांची अध्ययन करविण्याची फारच विलक्षण शैली होती. ही गोष्ट अप्पांचे शिष्यवर्गाचा नामपरिचय व ग्रंथ-परिचय झाला असतां सहसैव लक्ष्यांत आल्यावांचून राहणार नाहीं. अप्पांचा संस्कृत भाषेशीं परिचय आधुनिक संस्कृतज्ञा-प्रमाणें नसून त्यांचें संस्कृत भाषेचें अध्ययन शिष्यपरंपरागत प्राचीन संप्रदायानुसारी होतें आणि ह्मणूनच ते त्यांत पारंगत होऊन बसले होते. अप्पा हे प्रथम शास्त्रीय व्युत्पत्ति शिकून तयार झाल्यावर आपणांस खुबीदार भाषण करितां यावें असें गृहीत धरून ते साहित्यशास्त्राभ्यास करूं लागले आणि ते म-हाबुद्धिवान असल्यामुळें त्या शास्त्रांत फारच थोडक्या काळांत तयार झाले. शिवाय वैद्यक, ज्योतिष, इकडेही त्यांचा परिचय होताच. इतकें पूर्णज्ञान आणि असल्या प्रकारची मार्मिकता प्राप्त होण्यास त्याकालीं फारच अडचणी होत्या हें साहजिकच लक्षांत येईल. सध्यां सारखी मुद्रणकला त्यावेळेस कोठें होती? स्वत:च्या हस्तानें पुस्तकें तयार करून पढण्यास घ्यावीं लागत. तथापि ही उणीव पौर्वकालीन लोक आपल्या दीर्घोद्योगीपणा-मुळें व एकाच शास्त्राचा सतत अभ्यास चालविल्यानें तेव्हांच भरून काढीत. अप्पांनीं याचप्रमाणें सोप्या भाषेंत दुसरे किती एक ग्रंथ रचलेले ऐकिवांत आहेत, परंतु ते प्रकृत कोठेंही उपल-ब्ध झाले नाहींत. आह्मांस हा ग्रंथ कोठें व केव्हां मिळाला हें मागें प्रस्तावनेंत आह्मी सांगितलेंच आहे.

यांची पुराण सांगण्याची विलक्षण शैली होती ती अशी कीं:— ते आपल्या बुद्धिसामर्थ्यानें एका श्लोकाचे पांच पांच सात सात अर्थ करून सांगत असत असें ऐकतों. श्रीमती

गोपिकाबाई पेशवी यांची स्वारी ज्या वेळेस नाशीकच्या पैलतीरी पंचवटींत राहिली होती त्या वेळेस कांहीं दिवस गडिभट्ट अप्पा हेच त्यांचे पुराणिक होते. पुढें पेशवाई बुडाल्यानंतर श्रीत्र्यंबकेश्वर संस्थानचे कारभारी व विंचुरकरांकडून पेशव्यांचे दरबारी असणारे वकील रा. रा. काशीपंतबाबा जोगळेकर हणून मोठे उदार गृहस्थ होते, त्यांनीं व रा. रा. शंकर शुक्ल दाजी या नांवाचे त्या वेळेस त्या क्षेत्रीं मोठे सुज्ञ व प्रसिद्ध ग्राम होते, त्यांनीं उभयतांनीं गडिभट्ट अप्पा हे मोठे विद्वान व आपल्या क्षेत्रास भूषण असें जाणून अप्पांचे योग्यतेप्रमाणें त्यांची मानमान्यता राखून चांगले प्रकारें योगक्षेम चालविला.

अप्पांचे जवळ अध्ययन करून उदयास आलेली सर्वश्रुत मंडळी सर्वमान्य आहेत, त्यांपैकीं कांहींचीं नांवें सांगतों. नाशीक एथील प्रसिद्ध अलंकारिक भाऊ कळमकर व हरिबावा शास्त्री आणि त्र्यंबकेश्वर एथील सखाराम पुराणिक चुंभळे व जनार्दन बाबा तानपाठक वैद्य हे प्रसिद्ध विद्वान पुरुष गडिभट्ट अप्पा यांचेच शिष्य. गडिभट्ट अप्पा यांचे वंशीय श्रीत्र्यंबकेश्वरी अद्यापि आहेत. असल्या या महाविद्वान धुंडिराज कवीस शके १७५१ या वर्षी श्रीत्र्यंबकेश्वरीं देवाज्ञा झाली. त्यावेळेस यांचे वय सुमारें ७० । ७५ वर्षांचें होतें. अप्पांचें संस्कृत भाषाज्ञान व ग्रंथरचनाकौशल्य किती शुद्ध, सुंदर, मार्मिक व सरलान्वयी आहे हें अभिनवकादंबरीवरून लक्षांत येईल.

ही सर्व माहिती आम्हांस वे. शा. सं. रा. रा. गणेश शास्त्री लेले त्र्यंबककर हल्ली मु० नाशीक यांजकडून मिळाली. याबद्दल त्यांचे आभार मानतों. शास्त्रीबोवा हे नेहमीं परोपकार करण्यासाठीं अत्युत्कट इच्छा बाळगतात याजबद्दल त्यांचे आभार मानावे तितके थोडेच. शास्त्रीबोवांनीं आजपावेतों लोकांवर

व्याख्यानरूपानें, ग्रंथरूपानें व अध्यापनरूपानें बरेच उपकार केलेले सुप्रसिद्ध आहेत. यांचेठायीं सर्वव्यापकत्व व समयसूचकता हीं विशेष जागरूक आहेत. शिवाय, कविताशक्तींतही त्यांची इतकी ख्याति आहे, कीं, संस्कृत कविता ज्या वृत्तांत असेल त्याच वृत्तांत मराठी कविता शास्त्रीबोवा सरस व सरळ रचतात. असो. सारांश, याही पुरुषाप्रमाणें आतांच्या पिढींत माणसें निपजणें कठीण. करितां परेश असल्या पुरुषांस चिरायु करो.

॥ श्रीः ॥

श्रीधुण्डिराजकविविरचिता

अभिनवकादम्बरी ।

नत्वा श्रीजगदम्बां पिङ्गलकुलजोऽथ धुण्डिराजाख्यः ।
ऐच्छद्वाणकवेर्गामभिनवकादम्बरीं दोग्धुम् ॥ १ ॥
विदिशाख्यायां पुर्यां नृपतिरभूच्छूद्रको नाम ।
तमुपाहरत्कदाचिद्वुणिनं कीरं मतङ्गकन्यैका ॥ २ ॥
उद्धृत्य चैकपादं जयशब्दपुरःसरं स भूपस्य ।
लोकोत्तरं प्रतापं निजगाद शुकोऽनयार्यया सद्यः ॥ ३ ॥
'स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्नेः ।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्' ॥ ४ ॥
गुणरत्नसिन्धुमेनं ज्ञात्वा भूपः शुकं जगौ कुतुकात् ।
कस्त्वं, क्व जन्म तेऽभूदिति पृष्टः सोऽवदन्निखिलम् ॥ ५ ॥
पम्पासरस्तटेऽभून्मज्जन्माहं विवर्धितः पित्रा ।
न्यवसं कदाचिदागान्मृगयुः कश्चित्तमुद्देशम् ॥ ६ ॥
साकं कीरैर्निहते मत्ताते तेन दैवतो मुक्तः ।
लुण्ठन्नध्वनि मुनिना हारीतेनाहमाश्रमं नीतः ॥ ७ ॥
जाबालिस्तस्य पिता मां दृष्ट्वाथोऽवदन्मुनीन्सर्वान् ।
स्वकृताविनयस्यैतत्फलममुना भुज्यते शृणुत ॥ ८ ॥
तारापीडो नृपतिः पत्नी चाभूद्विलासवत्यस्य ।
अकरोद्व्रतान्यपुत्रावन्तिपुरेऽस्या दिवौकसस्तुष्टाः ॥ ९ ॥
स्वप्नेऽपश्यन्नृपतिर्भार्यावक्त्रे विशन्तमिन्दुमथ ।
उद्बुद्धो निजगाद स्वप्नं शुकनासमन्त्रिणं सुमतिम् ॥ १० ॥

श्रुत्वोवाच स भूपं प्राप्स्यसि सूनुं द्वितीयमिव चन्द्रम् ।
दृष्टं स्वप्नेऽपि मया भार्याङ्के पुण्डरीकमापतितम् ॥ ११ ॥
याते कतिपयकाले राज्ञी सुषुवे कुमारमप्रतिमम् ।
प्रासूत मन्त्रिवनिताप्यनु तां सूनुं गुणोत्तरं श्लाघ्यम् ॥ १२ ॥
चन्द्रापीड इतीड्यामकरोदभिधां नृपः स्वतनयस्य ।
वैशम्पायन इति वै मन्त्रिसुतस्याभवन्नाम ॥ १३ ॥
आजन्मतोऽनुरागो मन्त्रिसुतेऽभून्नृपात्मजस्याथ ।
पितृसंनिधावपि विना तेन न रेमे क्षणं बालः ॥ १४ ॥
शैशव एव कलानां यातः पारं सविद्यानाम् ।
पितृदत्तरत्नजातै**रिन्द्रायुध**पूर्वकैर्मुमुदे ॥ १५ ॥
अनुरक्तया जनन्या प्रहिता काचित्तु **पत्रलेखा**स्य ।
ताम्बूलवीटिदाभूदपरं हृदयं नु भाजनं प्रेम्णः ॥ १६ ॥
प्रकृतिसुभगं विनीतं प्रकृतीनामभिमतं सुतं ज्ञात्वा ।
तद्वाहौ विन्यस्य स्वधुरं युवराजशब्दभाक्चक्रे ॥ १७ ॥
अथ राजपुत्रयुक्तः प्रास्थित राजा दिशो जेतुम् ।
प्राची तदनु च याम्यापरा विजिग्ये ततश्च कौबेरी ॥ १८ ॥
तत्र हिरण्याख्यपुरे किंनरमिथुनं ददर्श मृगयायाम् ।
आदातुमन्वगात्तज्जविना **तुरगेण** चोद्यमानः सन् ॥ १९ ॥
हस्तप्राप्तमिवैनं दूरं नीत्वा तिरोबभूवैतत् ।
अध्वश्रमाद्विचिन्वन्नीरमदर्शत्सरः स **चाच्छोदम्** ॥ २० ॥
दर्शनमात्रादपगतखेदः पीत्वा जलं सुधास्वादु ।
तीरे वसन्नथारादशृणोद्गीतध्वनिं दिव्यम् ॥ २१ ॥
तत्प्रभवं जिज्ञासुर्हरिणैरुपदिश्यमानमार्ग इव ।
गत्वाद्राक्षीत्पुरतः शून्यं सिद्धालयं रम्यम् ॥ २२ ॥
श्रीचन्द्रशेखरेशं भक्त्यैवाभ्यर्च्य गायन्तीम् ।
ज्योत्स्नाधवलां ललनां तत्र लुलोकेऽतिविस्मितश्चित्ते ॥ २३ ॥

तद्रूपसंपदासौ तेन च गीतेन हारिणा राजा ।
तस्थौ कृष्टस्वान्तः प्रष्टुं गीतावसानकाले ताम् ॥ २४ ॥
गीतावसानसमये देवं नत्वा प्रदक्षिणीकृत्य ।
तस्मिन्नपातयत्सा दृष्टिं पीयूषसुस्निग्धाम् ॥ २५ ॥
स्वागतमाश्रममेहि, त्वं मे पूज्योऽतिथिः प्राप्तः ।
इति वादिनीं प्रयातस्तामनु तद्वाक्सुधातृप्तः ॥ २६ ॥
नीत्वाश्रमं सुकेशी विधिवत्संपूज्य तं सुखासीनम् ।
पप्रच्छ कस्त्वमेतां भूमिं प्राप्तो वदेह कस्माच्च ॥ २७ ॥
तुरगमुखानुगमान्तं तामाचख्यौ स्वजन्मनो वृत्तम् ।
सास्निह्यदत्र सुदती प्राकृष्टा तद्गुणैः सपदि ॥ २८ ॥
अथ तामपृच्छदेवं विनयादुपसृत्य सप्रणयम् ।
अङ्गीकृतं तु कतमज्जनुषा कुलमार्यया द्युसदाम् ॥ २९ ॥
प्रथमे वयसि च कस्मात्परिहृतभोगा तपस्यभूः प्रीता ।
अपहसितचन्द्रिकाया वपुषः कान्तेर्निदानं किम् ॥ ३० ॥
इति सा नृपेण पृष्टा दीर्घं ध्यात्वा विनिःश्वस्य ।
अश्रुभिरार्द्रौ पुरतश्चक्रे भूमिं दृशोः पतितैः ॥ ३१ ॥
तदवस्थां तां ज्ञात्वात्मानं मेने कृतापराधमिव ।
सलिलमुपाहरदस्यै परिमार्ष्टुं नयनजं वारि ॥ ३२ ॥
परिमृज्य साश्रुवदनं निजजन्मकथापरायणाभूत्सा ।
अयि राजपुत्र, वाञ्छा श्रोतुं चेच्छृणु समासतो वृत्तम् ॥ ३३ ॥
सन्ति कुलानि चतुर्दश लोके विदितानि चाप्सरसाम् ।
तत्र विधोः करजं यत्तस्मान्मातुर्ममाभवज्जन्म ॥ ३४ ॥
दक्षसुतारिष्टाभूत्तस्यां गन्धर्वतो जज्ञे ।
हंसः पिता ममाभूत्स च **गौरी** नामतो माता ॥ ३५ ॥
वर्षे किंपुरुषेऽसौ गन्धर्वाणामभूद्राजा ।
विहरन्गौर्या सुचिरं बुभुजे भोगांश्चिरं तत्र ॥ ३६ ॥

सुश्लाघ्ययोरधन्या पुत्र्यहमासं तयोरेका ।
कृत्वोत्सवं पिता मज्जन्मनि नामाकरोन्महाश्वेता ॥ ३७ ॥
शैशवमतिभुज्य सुखं यौवनपदवीमुपारूढा ।
अच्छोदाख्ये सरसि स्नातुं मात्रा सहाभ्यागाम् ॥ ३८ ॥
तत्र सलीलं सख्या विचरन्ती दूरतोऽजिघ्रम् ।
दिव्यं कुसुमसुगन्धं तत्प्रागां गन्धलोभेन ॥ ३९ ॥
तत्र युवानमपश्यं मुनितनयं मूर्तमिव कामम् ।
तां च श्रुतावहं यद्गन्धाकृष्टाथ मञ्जरीं तस्य ॥ ४० ॥
स्मरबाणभिन्नहृदया दर्शनतस्तस्य विह्वलाङ्गयभवम् ।
तस्य सखायं नत्वाप्राक्षं कोऽयं कुतश्च लब्धेयम् ॥ ४१ ॥
अवदत्सख्यां कुतुकिनि शृणु विप्रः श्वेतकेतुरभूत् ।
यद्रूपधर्षिता श्रीः पद्मवनेऽभूत्कृतार्थेव ॥ ४२ ॥
तत्क्षणजातं तनयं प्रददौ मुनये तवायमिति चोक्त्वा ।
तं स्वीकृत्य स तस्याप्यकरोन्नामाथ पुण्डरीक इति ॥ ४३ ॥
सोऽयं लक्ष्म्यास्तनयः पितृप्रसादादवाप्तविद्योऽभूत् ।
नन्दनमयाद्य दृष्टः कैलासादवतरन्मया साकम् ॥ ४४ ॥
सोत्पाट्य पारिजातान्यदधात्कर्णेऽस्य मञ्जरीमेताम् ।
सोऽयं दृग्विषयस्ते वृत्तमिदं मञ्जरीप्रवालस्य ॥ ४५ ॥
इत्युक्त्वा विरतेऽस्मिन्स युवा कुतुकादवोचन्माम् ।
छद्मप्रश्नेनालं स्वीकुरु यदि ते स्पृहास्त्यत्र ॥ ४६ ॥
अथ मञ्जरीमनङ्गाक्रान्तो न्यदधाच्छुतौ मे सः ।
आलोकयन्मुखं मे सस्पृहमवतार्य स्वश्रोत्रात् ॥ ४७ ॥
अङ्गुलिकपोलयोगादुभयोरभवत्स्मरावेशः ।
नाशासीत्करतोऽसौ पतितामपि चाक्षमालां स्वाम् ॥ ४८ ॥
अप्राप्तभूतलां तां कण्ठे कृत्वानुरक्तायाम् ।
मयि गन्तुमुद्यतायां मातृनियोगात्स मामाह ॥ ४९ ॥

अपहृत्य मेऽक्षमालां पदमपि गन्तुं न युक्तं ते ।
स्वीकुर्वेनामुक्त्वा मुक्ताहारो मया दत्तः ॥ ५० ॥
अथ मत्सखीं तरलिकां मामनुयान्तीमुपेत्य स प्राह ।
बाले केयं तरुणी दुहिता वा कस्य याति कुत्रेति ॥ ५१ ॥
निखिलं निवेदयन्तीं प्रणयादिदमाह मत्सखीं स युवा ।
लेखोऽयं मे सख्या एकाकिन्यै त्वया देयः ॥ ५२ ॥
वल्कलमापाट्य तदा संलिख्यासौ तमालरसतोऽथ ।
प्रददौ तस्यै सागात्स्वीकृत्यैनं जवेन मत्पार्श्वम् ॥ ५३ ॥
तद्विरहानलतप्तां सा मां संजीवयन्त्याह ।
खिद्यसि यद्विरहात्त्वं तेनेयं पत्रिका दत्ता ॥ ५४ ॥
ताम्बूलभाजनात्तामाहृत्यासौ समार्पयन्मह्यम् ।
तस्यामेतामार्यामार्येणाहं व्यलोकयं लिखिताम् ॥ ५५ ॥
'दूरं मुक्तालतया बिससितया विप्रलोभ्यमानो मे ।
हंस इव दर्शिताशो मानसजन्मा त्वया नीतः' ॥ ५६ ॥
बुद्ध्वा तदर्थमखिलं पुनरपि कामाग्निसंतप्ता ।
काहं केयं क्वासं न्यशामयं किमपि नो ततः प्रभृति ॥ ५७ ॥
अथ छत्रधारिणी मामवदद्यौ देवि मुनिसूनू ।
दृष्ट्वाच्छोदान्ते तिष्ठत्येकस्तयोर्द्वारि ॥ ५८ ॥
तूर्णं प्रवेशयैनं त्वमथ सखायं कपिञ्जलं तस्य ।
दृष्ट्वाभ्यर्च्य यथावद्वक्ष्यति किं वेत्यभिमुखैवासम् ॥ ५९ ॥
त्वद्विरहानलतप्तं मत्सुहृदं जीवयेति स प्राह ।
एषोऽञ्जलिर्विरचितः कुरु वा यत्ते क्षमं तत्र ॥ ६० ॥
किं संदिशाम्यमुष्मा इत्येवं चिन्तयन्त्या मे ।
माताजगाम तत्रेत्यगमदसौ मामनापृच्छ्य ॥ ६१ ॥
यातायां च जनन्यां विरहार्ताहं समं सख्या ।
तत्रागमं रजन्यां मद्विरहाद्यत्र सोऽभवत्तप्तः ॥ ६२ ॥

दूरादत्याक्रन्दं श्रुत्वा भीता किमेतदिति चाहम् ।
तत्र गतापश्यममुं विरतं विलपन्तमस्य सुहृदं च ॥ ६३ ॥
तदवस्थं स्वकृते तं ज्ञात्वारोदं तदा विचित्रमहम् ।
अनुगमननिश्चितां मां दिव्यः कश्चित्पुमानाह ॥ ६४ ॥
वत्से मा कुरु साहसमाप्स्यसि भूयः समागमं त्वमुना ।
इति जीवयन्निगरा मामुपरतमेनं निनाय लोकं स्वम् ॥ ६५ ॥
किमिदमिति सखायं तं पृच्छन्तीं मां स किंचिदपि नोक्त्वा ।
अपहृत्य मे सखायं यास्यसि कुत्रेति तं वदन्यातः ॥ ६६ ॥
आश्वस्ता दिव्यगिरा विस्मितहृदया ततः प्रभृति ।
उत्सृज्य सर्वभोगान्ध्यायन्ती तं वनेऽतिष्ठम् ॥ ६७ ॥
इति निखिलमात्मवृत्तं निवेद्य साभूत्ततस्तूष्णीम् ।
चन्द्रापीडोऽपि पुनः साश्चर्यं तां शनैः प्रोचे ॥ ६८ ॥
परिचारिका क्व ते सेत्यथ सा सुमुखी तमाहेदम् ।
शृणु राजपुत्र चित्रं यातासौ यत्र तद्रक्ष्ये ॥ ६९ ॥
अमृतादुत्पन्नं यत्कुलमप्सरसामभूदपरम् ।
जज्ञे तस्मान्**मदिरा** याभूद्भार्या तु **चित्ररथ**नाम्नः ॥ ७० ॥
गन्धर्वादुत्पन्नो यस्तु **मुनौ** दक्षतनयायाम् ।
वर्षे किंपुरुषेऽसौ गन्धर्वाणामभूद्राजा ॥ ७१ ॥
मदिराचित्ररथाभ्यां कन्यैकानन्तलक्षणा जज्ञे ।
कादम्बरीति नाम्ना सौन्दर्यस्यावधिः पूर्णः ॥ ७२ ॥
सा बालमित्रमपरं हृदयमिवाभूच्च जन्मनः प्रभृति ।
संगीतशास्त्रपारं बाल्ये याता मयैव सममेव ॥ ७३ ॥
अस्मद्दुःखाच्च तया सखिजनमध्ये प्रतिज्ञातम् ।
पाणिग्रहं न कुर्यामकृतार्थायां तु सख्यां मे ॥ ७४ ॥
श्रुत्वा निश्चयमस्याः पितरौ प्रीत्योचतुर्न किंचिदपि ।
अद्यादिष्टमुभाभ्यामुपदेष्टव्या त्वया वत्से ॥ ७५ ॥

इति तन्नियोगतोऽहं ज्ञात्वात्मानं च तद्धेतुम् ।
संप्रैषयं तरलिकां कादम्बर्यै समादेष्टुम् ॥ ७६ ॥
कुरु वचनं निजपित्रोर्यदि मद्वचनं प्रमाणभूतं ते ।
द्रक्ष्यसि नोचेन्मां त्वं जीवन्तीं नैतदादिष्टम् ॥ ७७ ॥
अधुनैव सा प्रयातानन्तरमेतां भुवं भवान्यातः ।
इत्युक्त्वा विरतासौ शिश्ये; राजापि विस्मितस्तस्थौ ॥ ७८ ॥
अन्येद्युरभ्यगात्सा साकं केयूरकेण तन्वङ्गी ।
नत्वा तामाचख्यौ वीणावाहोऽयमार्यया प्रहितः ॥ ७९ ॥
ज्ञात्वा केयूरमुखात्कादम्बर्याः सुनिर्बन्धम् ।
स्वयमागत्य करिष्ये यत्कर्तव्यं व्रजेति तं प्राह ॥ ८० ॥
याते केयूरेऽसौ चन्द्रापीडं महाश्वेता ।
ऊचे किंनरविषयो रम्यो गन्धर्वपूर्हृद्या ॥ ८१ ॥
सरलप्रकृतिर्देवी महानुभावा च सा प्रणयिनी मे ।
यदि न च गमने भारस्तत्रैवाद्यैव गच्छामः ॥ ८२ ॥
श्रुत्वोवाच कुमारो भगवति किमिदं हि प्रोच्यते मह्यम् ।
परवानयं जनस्ते दर्शनतस्तद्यथेच्छमुपयुङ्क्ष्व ॥ ८३ ॥
आरुह्य वाजिरत्नं प्रययौ स पुरं ततश्च गान्धर्वम् ।
पश्यन्विचित्रशोभाः कादम्बर्याः सकाशमगमत्सः ॥ ८४ ॥
कादम्बरी विलोक्य प्राप्तां देवीं महाश्वेताम् ।
कण्ठे जग्राह भृशं कुशलप्रश्नादृता च तथा ॥ ८५ ॥
हंसी कुमारविषयं वृत्तं देव्यै निवेदयामास ।
सखि राजपुत्र एष प्राणेभ्योऽपि प्रियोऽस्माकम् ॥ ८६ ॥
मनुजेषु रत्नभूतं गुणगणसिन्धुं समर्हयैनं त्वम् ।
जितमदने निजरूपाद्विश्रब्धा त्वं मयीव भव चास्मिन् ॥ ८७ ॥
इत्युक्ते च तयासौ तस्य च रूपेण धर्षिता बाला ।
स्वसमीपमेव तस्मा आसनमददात्स्वकं तस्यै ॥ ८८ ॥

मदलेखयाङ्घ्रियुगुलं तस्य प्राक्षालयद्धंस्याः ।
प्रक्षाल्य स्वयमासांचक्रे स्थाने निजेऽतिसंतुष्टा ॥ ८९ ॥
चन्द्रापीडस्य तथा कादम्बर्याः परस्परालोकात् ।
अनुरक्तयोर्विकारः कोऽप्यभवन्मान्मथश्चित्ते ॥ ९० ॥
सव्रीडं तद्वक्त्रं विलोकयन्ती पुनः पुनः सुदती ।
मेने धन्यतमत्वं स्वाङ्गणोस्तद्वन्मनुष्यलोकस्य ॥ ९१ ॥
चन्द्रापीडोऽपि निजश्रमसाफल्यं तदीक्षया मेने ।
उपकारि चानुसरणं किंनरमिथुनस्य यद्वशोऽत्रागाम् ॥ ९२ ॥
प्रीत्यालप्य विचित्रं हंस्या साकं तु चित्ररथकन्या ।
ताम्बूलवीटिदानावसरे प्रोक्ता तया भूयः ॥ ९३ ॥
सखि राजपुत्र एष प्रीत्यास्माभिः समर्च्योऽद्य ।
ताम्बूलमस्य देहि प्रथमं यदि चास्य रोचते तर्हि ॥ ९४ ॥
श्रुत्वा सव्रीडं सा तामूचे त्वं प्रयच्छास्मै ।
न च मे पाणिः प्रसरति कर्तुं धाष्टर्यं करोमि किं ब्रूहि ॥ ९५ ॥
अथ सा बलान्नियुक्ता वलितग्रीवास्य ताम्बूलम् ।
प्रादादात्मानं वा दापयति स्म स्मरेण किमुतेह ॥ ९६ ॥
तत्करसङ्गादस्याः सात्त्विकभावोऽभवद्वपुषि ।
धीरप्रकृतिरसावप्यात्मनि न शशाक गूहितुं विकृतिम् ॥ ९७ ॥
मदिराचित्ररथाभ्यां द्रष्टुं हंसी समाहूता ।
तद्दर्शने जिगमिषुर्देवीं प्रोचेऽस्य कल्पय स्थानम् ॥ ९८ ॥
स्मित्वा मनस्यवोचन्निखिलकुमारीमनोधिवासाय ।
किं कल्पयामि भूयो व्यक्तं प्रोचे वदास्य रुचिरं यत् ॥ ९९ ॥
दर्शनमात्रादस्य स्वशरीरेऽहं प्रभुर्न किं विभवे ।
तत्संदिश त्वमस्मै प्रीतिं यत्रास्य मानसं यायात् ॥ १०० ॥
क्रीडामणिगिरिमस्मै देहि निवासार्थमिति सोक्त्वा ।
अगमद्गन्धर्वपतिं चन्द्रापीडोऽपि मणिगिरिं यातः ॥ १०१ ॥

देव्या विसृष्टभोगान्भुञ्जानोऽथापराह्णे ताम् ।
अद्राक्षीन्मदलेखां प्राप्तामादाय हारमनुरूपम् ॥ १०२ ॥
उदधिस्तु सर्वरत्नान्यर्थिभ्योऽदादमुं शेषम् ।
प्रादाद्वरुणायासौ गन्धर्वेन्द्राय देव्यै सः ॥ १०३ ॥
यद्यपि तव वपुषोऽयं नास्त्यनुरूपस्तथापि राजेन्द्र ।
देव्याः प्रणयविभङ्गं प्रथमं कर्तुं न युक्तं ते ॥ १०४ ॥
इत्युक्त्वा मदलेखा वक्षस्यस्यार्पयद्धारम् ।
देवीगुणप्रयुक्ताः कुर्वन्स कथास्तया मुमुदे ॥ १०५ ॥
यातायामथ तस्यां प्रययौ देव्यल्पपरिजना तत्र ।
तां सत्कृत्य स भूमावुपाविशत्सापि भूतले तस्थौ ॥ १०६ ॥
दर्शनमात्रप्रीते दासजने कोऽयमादरातिशयः ।
न खलु गुणलेशमात्मनि वीक्षेऽहं यत्फलं प्रसादस्ते ॥ १०७ ॥
इति तां विविधवचोभिर्विवशामकरोच्च सा कटाक्षैस्तम् ।
स्थित्वाचिरं ततोऽगात्केयूरं तत्र संनियुज्यासौ ॥ १०८ ॥
हंस्या महानुभावं देव्यनुरागं महान्तं च ।
सौजन्यं च सखीनां तेन समं वर्णयंस्तस्थौ ॥ १०९ ॥
प्रातः प्रसाद्य देवीं गन्तुं हंसीमुखेन नृपसूनुः ।
ऊचे स्मर्तव्योऽहं परिजनवार्तासु कासुचिद्देव्या ॥ ११० ॥
कृच्छ्रात्तयाप्यनुमतो गन्तुं गन्धर्वसूनुभिः साकम् ।
अच्छोदमाससाद स्कन्धावारं निजं च तत्र गतम् ॥ १११ ॥
वैशम्पायनमुख्यैः सेनाध्यक्षैः सुसत्कृतस्तत्र ।
न्यवसत्कथयांचक्रे तद्वै गन्धर्वपुरवृत्तम् ॥ ११२ ॥
अन्येद्युः केयूरो विविधान्भोगान्प्रगृह्य तत्रागात् ।
दूरादालोक्यासावेहीत्युक्त्वालिलिङ्गैनम् ॥ ११३ ॥
विरहादत्यस्वस्थां देवीं तस्मादसौ बुद्ध्वा ।
अश्वोऽश्व इत्थमुक्त्वा प्रययौ सह पत्रलेखया तत्र ॥ ११४ ॥

हिमगृहमध्ये दृष्ट्वा देवीं स्ववियोगशून्यमनसं ताम् ।
हंसीं पूर्वं नत्वा निकटस्थितमासनं भेजे ॥ ११५ ॥
केयूरकोऽथ देवीमवदद्धृदयं द्वितीयमस्येमाम् ।
ताम्बूलवीटिदात्रीं पश्यार्ये **पत्रलेखां** त्वम् ॥ ११६ ॥
सत्कृत्य तां यथावत्स्वासन एव न्यवेशयद्देवी ।
तद्गुणरूपोपहृता प्राणेभ्योऽपि प्रियां मेने ॥ ११७ ॥
स्वालोकनप्रमुदितां भाविवियोगाद्विषण्णहृदयां ताम् ।
दृष्ट्वा गन्धर्वसुतां सश्लेषं भूपतिः प्रोचे ॥ ११८ ॥
कामरतिं हृदि कृत्वा प्राप्तस्तीव्रोऽद्य संतापः ।
श्रुत्वेदं मदलेखा प्रादादस्योत्तरं युक्तम् ॥ ११९ ॥
किं किं घटेत नास्याः कौमारं भावमाभजन्त्यास्तु ।
सश्लेषवाक्यतोऽस्य स्वान्तं दोलाधिरूढमिव चाभूत् ॥ १२० ॥
तत्प्रेमपाशबन्धान्मुक्त्वात्मानं कथंचिदवदत्ताम् ।
शुश्रूषितुं तवाङ्घ्रिं प्राप्तं दासं तु पुनरवेहि त्वम् ॥ १२१ ॥
इत्थं गन्धर्वसुतासंनिधितो जिगमिषुर्देव्या ।
उक्तः केयूरमुखाद्यास्यति पश्चात्तु पत्रलेखेयम् ॥ १२२ ॥
देवीप्रसादमेषानुभवत्विति तां विसर्ज्यैव ।
स्कन्धावारं प्राप्तः पितुरायातान्ददर्श लेखहरान् ॥ १२३ ॥
अविलम्बेन कुमारः पुरमायात्विति निवेशसमकालम् ।
कादम्बरीनिराशो निरगात्सुहृदं नियुज्य सेनायाम् ॥ १२४ ॥
पित्रोरतर्कितेन स्वागमनेनातुलं मोदम् ।
कृत्वा सुखं न्यवात्सीत्कादम्बर्या वियोगसंतप्तः ॥ १२५ ॥
अचिरेण पत्रलेखा प्रागाद्देव्या विसृष्टा सा ।
निजगाद वृत्तमखिलं देवीविषयं कुमाराय ॥ १२६ ॥
बहुना किं कथितेन प्राणा देव्यास्त्वदायत्ताः ।
अत्र हि काले नीते भूयाज्जगदान्ध्यमद्यैव ॥ १२७ ॥

अवधार्य तामवस्था देव्या मूर्छावशोऽभूत्सः ।
कृच्छ्राच्च लब्धसंज्ञः स उपायमचिन्तयद्गन्तुम् ॥ १२८ ॥
सिप्रातटे कदाचित्कालं गमयन्सपत्रलेखोऽसौ ।
केयूरकं तदानीं त्वरयोपगतं ददर्श सह भृत्यैः ॥ १२९ ॥
दूरावनतं दोर्भ्यामुत्थाप्यालिङ्ग्यंश्चैनम् ।
देवीकुशलमपृच्छत्किं वा संदिष्टमार्ययेत्युक्तम् ॥ १३० ॥
अद्य नु कुशलं तस्यास्तदपृच्छद्यद्भवान्कुशलम् ।
न च मयि किंचिच्च तया संदिष्टं नाहमार्यया प्रहितः ॥ १३१ ॥
यातः कुमार इति वै श्रुत्वा वाचं ततः प्रभृति ।
निःश्वस्य दीर्घमेषा मूकीभूता लुलोठ शयनीये ॥ १३२ ॥
नैवालपत्सखीं स्वां मदलेखां निकटवर्तिनो नास्मान् ।
उक्तं तयैकदैतत्कस्मादत्र स्थिताः सर्वे ॥ १३३ ॥
बुद्ध्वाशयमथ तस्यास्त्वरयोपगतोऽस्मि पादमूलं ते ।
त्वद्विरहानलतप्तां गमनेनोज्जीवय क्षिप्रम् ॥ १३४ ॥
श्रुत्वा केयूरवचो द्विगुणं मूर्छामवापासौ ।
उद्बुध्य गन्तुमिच्छन्विविधं चाचिन्तयन्मनसि ॥ १३५ ॥
गमनं कथं भवेन्मे पित्रोरनवाप्य चाद्याज्ञाम् ।
व्यपदिश्य किं प्रयामि स्पष्टं कथये नु सा वियोगार्ता ॥ १३६ ॥
कस्मिन्न्यस्यामि धुरं कोऽस्मिन्कार्ये भवेत्सहायो मे ।
तमृते सखायमेकं मन्त्रिसुतं सोऽपि नायातः ॥ १३७ ॥
इत्थं चिन्तयतोऽस्य श्रुतिपथमागात्तु किंवदन्त्येषा ।
प्राप्तः स्कन्धावारो दशपुरमध्येति सोऽभवत्तुष्टः ॥ १३८ ॥
केयूरकं मुदाह प्राप्ता देवी मयावगच्छेति ।
प्राप्तः सखा ममासौ यो मे गन्तुं भवेद्वारम् ॥ १३९ ॥
आदाय पत्रलेखां त्वं याह्यग्रेऽहमागतोऽनुपदम् ।
यद्विज्ञाप्यं तु मया सैषा देवीं स्वयं निगदेत् ॥ १४० ॥

बद्धाञ्जलिं शिरसि ते मद्वचसा सा प्रणम्य विज्ञाप्या ।
आगमनं विफलं मे जगदान्ध्यं च न भवेत्तथा कार्यम् ॥ १४१ ॥
इति तां नियुज्य, पितरं सख्युर्विज्ञाप्य दर्शनार्थं सः ।
कतिपयभृत्यैः सहितोऽतर्कित एवाप दशपुरं तुष्टः ॥ १४२ ॥
तत्रादृष्ट्वा सुहृदं सेनाध्यक्षान्विलोक्य दीनांस्तान् ।
मत्वानिष्टं दीनः पप्रच्छैतान्किमस्य संजातम् ॥ १४३ ॥
शिरसा प्रणम्य सर्वे देवं विज्ञापयांचक्रुः ।
जीवति मन्त्रिसुतस्ते यन्नायातः शृणुष्व तद्धेतुम् ॥ १४४ ॥
याते भवति स चास्मानूचेऽच्छोदं सरः पुण्यम् ।
स्नात्वाद्य तत्र सर्वे यास्यामः श्वोऽविलम्बेन ॥ १४५ ॥
इत्युक्त्वाच्छोदेऽसौ स्नात्वापश्यत्समन्ततः किमपि ।
भ्रान्त इवाविष्ट इव प्रोचेऽहं यामि नो व्रजत ॥ १४६ ॥
तदवस्थं तं दृष्ट्वा बहुशो यत्नः कृतोऽस्माभिः ।
अप्रभवो निर्बन्धं दूरीकर्तुं ततः प्रयाताः स्मः ॥ १४७ ॥
श्रुत्वा तन्निर्बन्धे हेतुं नावैत्स चिन्तयन्किमपि ।
भवतु स्वयं गमिष्याम्यधुना तत्रास्ति मे देवी ॥ १४८ ॥
इति निश्चित्य स गत्वा स्वपुरे भूपं ददर्श मन्त्रिगृहे ।
आश्वासयन्तमेनं शुकनासं विदितवृत्तान्तम् ॥ १४९ ॥
अस्य नु किंचित्स्खलितं यन्नायातः स इति राज्ञः ।
श्रुत्वा वाचमुवाचापयशो मार्ष्टु प्रदेह्याज्ञाम् ॥ १५० ॥
शुकनासः श्रुत्वेदं भूपमवोचत्किमुच्यतेऽश्राव्यम् ।
तिर्यग्जातिविचेष्टोऽनुभवत्वेषोऽनयस्य विकृतिं स्वाम् ॥ १५१ ॥
पित्रोः प्राप्यानुज्ञां शुकनासमुखेन तत्र गन्तुं सः ।
करतलवशगां मेने देवीं कादम्बरीं सपदि ॥ १५२ ॥
कृच्छ्राद्विसर्जितः सन्पित्रा मात्रा च मन्त्रिणा राजा ।
अचिरादच्छोदाख्यं प्राप सरः पूर्वदृष्टं सः ॥ १५३ ॥

तत्र विचिन्वन्सुहृदं नापश्यन्नास्य लिङ्गमपि ।
यातो भवेत्कदाचिद्धंस्या निकटे तयाथ विदितः सन् ॥ १५४॥
इत्थं विचिन्त्य गत्वापश्यद्दीनां महाश्वेताम् ।
तरलिकया धृतवपुषं दृष्ट्वानिष्टं महन्मेने ॥ १५५ ॥
अपि वद भगवत्यास्त्वं हेतुं दुःखस्य नायमल्पः स्यात् ।
प्राप्ते मयि मां भगवत्यवेक्षते नैव वक्ति नो किंचित् ॥१५६॥
इति तामापृच्छन्तं भगवत्यवदत्किमालपेदेषा ।
शृणु राजपुत्र, दुःखं श्रोतुं वक्तुं न शक्यं यत् ॥ १५७ ॥
श्रुत्वा गतं भवन्तं कादम्बर्या निराशाहम् ।
अतपं तप एवात्र प्राणानां शोषणं यत्स्यात् ॥ १५८ ॥
एकस्मिन्दिवसेऽहं विप्रयुवानं कमप्यैक्षे ।
भवतः समानवयसं मां दृष्ट्वा सोऽभवद्व्यग्रः ॥ १५९ ॥
सुन्दरि तपस्त्वयेदं क्रियते कस्मात्किमस्ति ते प्राप्यम् ।
प्राप्यं तवापि चेत्स्यात्कामोऽधिज्यं वृथा धनुर्वहति ॥ १६० ॥
त्वद्रूपधर्षितोऽहं विह्वलचेताः कृशाङ्गयभवम् ।
कामः पञ्चशराणां करोति लक्ष्यं ततश्च मां पाहि ॥ १६१ ॥
बुद्ध्वास्य दुष्टभावं नावोचं किंचिदप्येनम् ।
तस्मादन्यत्रागां वारय दुर्वृत्तमिति सखीमुक्त्वा ॥ १६२ ॥
अथ मां निशीथसमये चन्द्रज्योत्स्नोज्ज्वले स पुनः ।
अभ्येत्य किमपि वाञ्छन्निजपाणिं संप्रसारयामास ॥ १६३ ॥
अथ माविशत्प्रकोपः शप्तुमवोचं सुदुर्धियं तमहम् ।
न दहन्ति पञ्चभूतान्यविनयभाजः किमद्य देहं ते ॥ १६४ ॥
तिर्यग्जातिविचेष्टः शुक इव वक्तुं त्वमीहसे सम्यक् ।
तामेव जातिमद्य प्राप्नुहि नैवं करिष्यसेऽविनयम् ॥ १६५ ॥
वाक्यावसान एव स्वकृतात्पापान्नु मद्वचसा ।
अपतत्क्षितावचेष्टः पश्चात्सुहृदं तवाहमश्रौषम् ॥ १६६ ॥

श्रुत्वा चन्द्रापीडस्तामूचेऽस्मिन्मया जनुषि।
गन्धर्वराजपुत्र्याः सेवां कर्तुं न पारितं देवि ॥ १६७ ॥
अपरस्मिन्नपि जन्मनि त्वमेव भव तद्विधात्री मे ।
इति तां ब्रुवतो हृदयं प्रास्फुटदस्य क्षणाद्राज्ञः ॥ १६८ ॥
तदवस्थं तं दृष्ट्वा तां हंसीं तरलिकोत्सृज्य ।
दध्रे देहं राज्ञो हा हा कृत्वाथ नष्टसंज्ञस्य ॥ १६९ ॥
हंसी तु तद्विलोक्य व्यलपत्तत्केन शक्यते वक्तुम् ।
अत्रान्तरे तु देवी शुश्रावाच्छोदसरसि तं प्राप्तम् ॥ १७० ॥
लब्धानुज्ञा हंस्या दर्शनमिषतः स्वपित्रोः सा ।
मदलेखया सहागाद्रतिरिव कामं धृताकल्पा ॥ १७१ ॥
यदि सत्यमागतः स्यात्स शठो नाहं तमालपाम्यद्य ।
वक्रोक्तिभिस्त्वयासौ वाच्यः स्वसखीं समादिदेशैतत् ॥१७२॥
आलम्ब्य पत्रलेखापाणिं केयूरकोपदिष्टाध्वा ।
तत्रागत्य वियोगात्तदवस्थं तं विलोक्य मूढाभूत् ॥ १७३ ॥
उत्सृज्य पाणिमस्याः संनिधिमस्याप पत्रलेखासौ ।
व्यलपच्चैत्ररथी सा स्वकृते विरतं कुमारमवगत्य ॥ १७४ ॥
मदलेखावोचत्तां मा कुरु शोकं कुलं पाहि ।
श्रुत्वापदं भवत्याः पितरौ प्राणान्प्रहास्यतो नियतम् ॥१७५॥
सा तां जगाद मूढे वाञ्छा पित्रोर्जिजीविषोर्भवति ।
मम तु वरं जीवनतस्त्यागोऽसूनामनेन सह गन्तुम् ॥ १७६ ॥
मत्संबन्धि समग्रं देह्यर्थिभ्यश्च मणिगिरिं मुनये; ।
वीणां स्वीकुरु; पितरौ सान्त्वय; मा त्वं शुचं याहि ॥१७७॥
हंसीमाश्लिष्योचे प्रत्याशा तेऽस्ति कापि न च मे सा ।
आमन्त्रये ततस्त्वां भूयाद्भूयोऽपि संगमस्ते मे ॥ १७८ ॥
इत्युक्त्वा नृपदेहं पुष्पैरभ्यर्च्य तच्चरणौ ।
स्वाङ्के कृत्वा भेजे श्रान्तावेतौ मदर्थमिति सोक्त्वा ॥ १७९ ॥

तद्देहतोऽथ धवलं ज्योतिर्गत्वा खमब्रवीद्धंसि ।
आश्वासिता मया त्वं पूर्वं वत्से यतोऽसि सप्राणा ॥ १८० ॥
अस्ति च मल्लोके ते देहोऽक्षत एव पुण्डरीकस्य ।
शापावसानकाले प्राप्स्यसि भूयस्त्वनेन संयोगम् ॥ १८१ ॥
चन्द्रापीडशरीरं त्वविनाशि ममैव देहोऽयम् ।
कादम्बरीकरतलस्पर्शादाप्यायितं भूयः ॥ १८२ ॥
संगंस्यतेऽनयासौ शापान्ते स्वल्पकालेन ।
प्रत्ययतो वपुरेतत्तिष्ठत्वनयार्हणीयमनिशं हि ॥ १८३ ॥
अथ यातेऽन्तर्धानं ज्योतिषि सर्वाः सुविस्मिता आसन् ।
इन्द्रायुधं प्रगृह्यामज्जद्वारिणि च पत्रलेखा सा ॥ १८४ ॥
नाडीद्वयात्सरस्तोऽदृश्यत स मुनिः कपिञ्जलो हंस्या ।
नत्वा पृष्टोऽशेषं वृत्तं सोऽप्याह तां क्रमाद्राज्ञः ॥ १८५ ॥
नीते मत्सखिदेहे यातोऽहं तदनु तल्लोकम् ।
दिव्यासने विधुं तं दृष्ट्वाप्राक्षं कुतोऽयमानीतः ॥ १८६ ॥
अवदत्स मां सखा ते कामार्तो माशपद्रात्रौ ।
जन्मनि जन्मनि भावं मार्त्ये भज मां निपीडयसि यत्त्वम्१८७
श्रुत्वाकृतागसं स्वं शप्तं प्रतिशापमस्य ददेऽहम् ।
भव मत्समानदुःखः पश्चाद्धंस्यास्तु व्यतिकरोऽधिगतः॥१८८॥
दोषात्स्वकृताद्विरसौ जनिष्यते भुवि मया साकम् ।
जन्मनि जन्मनि वीप्सा चरितार्था येन भवति तव सुहृदः१८९
तत्तस्या शापान्तं तिष्ठत्वेवितं मया शरीरमिदम् ।
आचक्ष्व चास्य पित्रे सोऽपि च यत्क्षेममत्र तत्कुर्यात्॥१९०॥
गच्छन्तं मामशपद्दिव्यः कश्चित्तु तापसस्तत्र ।
उल्लङ्घ्य मां प्रयातो वाजीव त्वं भवाशु वाजीह ॥ १९१ ॥
तमवोचं प्रणतो मे व्यग्रस्येष्टार्थमपराधम् ।
क्षमसे न चेत्सखा मे भूयात्तेनास्तु मे सङ्गः ॥ १९२ ॥

सख्युर्मित्रस्य त्वं वाहनतां प्राप्य तस्यान्ते ।
मोक्ष्यस्यवोचदित्थं भूत्वाश्वोऽहं ततोऽपतं जलधौ ॥ १९३ ॥
अथ तासु विस्मितास्वप्राक्षीद्वृत्तं तु पत्रलेखायाः ।
कादम्बरी, न जाने किंचिदहं यामि तत्पितुः पार्श्वम् ॥ १९४ ॥
इति याते तस्मिन्सा देवी नृपदेहमर्चयांचक्रे ।
दिव्यैर्विचित्रभोगैरत्यादरतो मनस्यथाश्वस्ता ॥ १९५ ॥
अतिवाह्य तद्दिनं सा दृष्ट्वान्येद्युस्तथैव दिव्याङ्गम् ।
विस्मितहृत्स्वसखीभ्योऽदर्शयदभवंश्च ता मुदिताः ॥ १९६ ॥
आकार्य राजलोकं चन्द्रापीडानुयायिनं तत्र ।
वृत्तं निवेद्य निखिलं तद्वपुरस्मै च दर्शयामास ॥ १९७ ॥
दृष्ट्वा प्रत्ययमेते विस्मितचित्ता जगुर्देवीम् ।
त्वत्संबन्धादेतत्सर्वं संपत्स्यते शुभोदन्तम् ॥ १९८ ॥
तारापीडस्य चरान्प्राप्तानत्रान्तरे श्रुत्वा ।
दत्त्वा त्वरितकमेतैः सार्धं तान्प्रेषयांचक्रे ॥ १९९ ॥
आगत्योज्जयिनीं ते राज्ञीं राजानमूचिरे व्यक्तम् ।
दृष्टोऽच्छोदेऽस्माभिः शेषं त्वस्माच्च त्वरितकाच्छृणुतम् २००
अवगत्यास्माद्वृत्तं कष्टं विस्मयकरं च भूपः सः ।
देहप्रत्ययमपि च श्रुत्वायासीत्सपरिकरस्तत्र ॥ २०१ ॥
आगत्य तत्र दृष्ट्वा तद्देहं पूर्ववद्राजा ।
कादम्बरीप्रभावान्मेने सर्वं शुभोदर्कम् ॥ २०२ ॥
श्रुत्वागतं नरेन्द्रं भेजे स्थानान्तरं महाश्वेता ।
मोहान्धकारमेषा देवी कादम्बरी सपदि ॥ २०३ ॥
तदवस्थं सूनुं स्वं शोचन्तीं स्वां प्रियां राजा ।
ऊचे खेदोऽयुक्तः सान्त्वय कादम्बरीं खिन्नाम् ॥ २०४ ॥
यद्भाग्यात्सुतदेहं पश्यामोऽद्यापि पूर्ववद्दिव्यम् ।
सा मे स्नुषातिमोहं याता तन्मेऽतिदुःखाय ॥ २०५ ॥

अथ सा कृत्वाङ्के तां परिमृज्य मुखं निवार्य बाष्पौघम् ।
ऊचे भाग्यात्तेऽहं पश्याम्येनं त्यजाम्ब मोहं त्वम् ॥ २०६ ॥
आश्वासिताथ देवी नत्वा पादौ तयोः श्वश्वोः ।
लज्जाविनम्रवदना भेजे पार्श्वं विलासवत्याः सा ॥ २०७ ॥
विनियुज्य पूर्ववत्तां परिचर्यायै स्नुषां तस्य ।
अतपत्तपः सभार्यः शुकनासेन सह मन्त्रिणा राजा॥२०८॥
जाबालिरित्थमवदच्छुकवृत्तं तान्मुनीन्सर्वान् ।
पश्यत कथारसस्याक्षेपं नीतः सुदूरममुनाहम् ॥ २०९ ॥
यत्कथयितुमारब्धं तत्तु तथा वर्ततेऽद्यापि ।
सोऽयं दिव्याल्लोकाद्भ्रष्टः शुकतामवाप चाञ्चल्यात् ॥ २१० ॥
शूद्रकमाह शुकोऽसौ कथयति वृत्तं मुनौ मदीयं तु ।
जन्मद्वयस्मृतिर्मे प्रादुरभूत्तत्क्षणादखिला ॥ २११ ॥
तमवोचं प्रणतोऽहं भगवंस्तत्रास्ति जिगमिषा मेऽद्य ।
स्फुटितहृदयः सखा मे यत्रास्ते मत्कृते विरतः ॥ २१२ ॥
प्रणयकुपितोऽवदन्मां गच्छति नाद्यापि चाञ्चल्यम् ।
भूत्वा गमनसमर्थो गच्छसि तावत्सुखं तिष्ठ ॥ २१३ ॥
हंस्या रागः पूर्वश्चन्द्रापीडे स च स्नेहः ।
उत्कण्ठितं मनोऽभूदुभयोर्गन्तुं सकाशं मे ॥ २१४ ॥
हारीतोऽपृच्छत्तं भगवन्कस्माच्चिरायुरासीन्नो ।
स्त्रीवीर्यादुद्भूतेरेवं प्रोचे पिता पुत्रम् ॥ २१५ ॥
भुक्त्वा कथारसं स प्रोचे ताञ्शर्वरी याता ।
जातः स्नातुं समयो यातेत्युक्त्वा स्वयं यातः ॥ २१६ ॥
मुनिपुत्रोऽपि ततो मां शयने संस्थाप्य कर्मणे यातः ।
आपत्स्मृत्या चिन्तां प्राविशमहमत्र किं करोमीति ॥ २१७ ॥
हारीतो मामूचे त्वामन्विष्यन्कपिञ्जलः प्राप्तः ।
श्रुत्वेत्थं विवशत्वान्मां नय तत्रेति तं प्राह ॥ २१८ ॥

दृष्ट्वा कपिञ्जलमहं चुम्बितुमिच्छन्निवाश्लिष्यन् ।
गद्गदिकारुद्धरवः प्रोचे तं दीनया वाचा ॥ २१९ ॥
जन्मद्वयोत्तरं मे दर्शनमद्येह तव जातम् ।
विमुखे विधौ भवन्ति प्रायः सर्वाणि विमुखानि ॥ २२० ॥
सोऽपि च मच्चरणौ स्वे शीर्षे कृत्वा रुरोद भृशदीनः ।
आश्वासयद्वचोभिर्हृद्यैरथ मे प्रियं मित्रम् ॥ २२१ ॥
सप्रश्रयमूचे मां ज्ञातं पित्रावयोः सर्वम् ।
विमुखं शमयितुमस्मद्दैवं कर्मापि चारब्धम् ॥ २२२ ॥
श्रीरपि तत्रैवास्ते ताभ्यामेतत्तवादिष्टम् ।
अत्राकर्मसमाप्ति वस चाञ्चल्यं निगृह्य; भावि शुभम् ॥२२३॥
यास्याम्यहं पितुस्ते पार्श्वे चेदं निवेद्य यातः सः ।
कतिपयदिवसानस्थां जाबालेराश्रमे सुखासीनः ॥ २२४ ॥
एकस्मिन्दिवसेऽहं मत्वात्मानं क्षमं वियत्पतने ।
उड्डीयागां नभसि श्रान्तः सुष्वाप वृक्षमूलेऽहम् ॥ २२५ ॥
तावद्बद्धं पाशैरात्मानं वीक्ष्य दुःखितः पुरतः ।
अन्त्यजमेकमदर्शं प्राहैनं दीनया वाचा ॥ २२६ ॥
जातिस्मरोऽहमासं मुनिसूनुः, सुमुख मां मुञ्च ।
सन्त्यन्यानि वयांसि, प्राणत्राणे ममास्तु ते कुशलम् ॥२२७॥
स्मित्वाब्रवीदसौ मद्भर्तुः पुत्री कुतूहलिन्यस्ति ।
तस्याः श्रुतिपथमेषा वार्ता केनापि यापिता भद्र ॥ २२८ ॥
अस्त्याश्रमेऽतिगुणवाञ्जाबालेः कीर इत्येवम् ।
आदातुं बहवस्त्वां याता मे त्वं तु लब्धोऽसि ॥ २२९ ॥
तस्याः सकाशमद्य त्वामेष प्रापये सा ते ।
बन्धे वा मोक्षे वा प्रभुरिति वदताहमपनीतः ॥ २३० ॥
दृष्ट्वा सा मां प्रोचे यास्यसि कुत्राधुना वत्स ।
इत्युक्त्वा निन्द्ये मां पञ्जरमध्ये निवेशयामास ॥ २३१ ॥

धिक् पुण्डरीकतस्तु प्राप्तोऽस्येतां दशां यत्त्वम् ।
मुनितनयत्वमपास्यापतितः पाणौ दिवाकीर्तेः ॥ २३२ ॥
युक्तं तदेवमधुना पितृवाक्योल्लङ्घिनो मूढ ।
एवं विनिन्द्य बहुशः स्वात्मानं निश्चयं चक्रे ॥ २३३ ॥
नैवालपाम्यहं वै नालपतो मे भवेन्मोक्षः ।
नाश्नामि च न पिबामि त्यक्ष्याम्येवं तनुं निन्द्याम् ॥ २३४ ॥
अथ चाण्डालदुहित्रा बहुशः पानाशने प्रयुक्तोऽपि ।
नाश्नां किमप्यमुञ्चं चीत्कारमहं तु तुद्यमानः सन् ॥ २३५ ॥
प्रोक्तस्तया किमेतन्न पिबसि नात्स्यस्ति कः फले दोषः ।
चाण्डालोदकमपि चापतितं भूमौ न दोषाय ॥ २३६ ॥
यदि ते विचिकित्सात्र प्राप्तोऽस्येतां दशां कस्मात् ।
आदौ तथा विधेयं पश्चात्तापो यथा न स्यात् ॥ २३७ ॥
तद्वाक्यं त्वविगीतं मत्वाजक्षं फलानि नीरं च ।
एवं च सतः कालो विमुखो यातोऽथ सोऽनुकूलोऽभूत्॥२३८॥
दृष्ट्वा प्रत्यूषेऽथो पक्कणमपरं तु दिव्यलोकमिव ।
तां रूपिणीमिव रमां रत्नाढ्यं पञ्जरं स्वस्य ॥ २३९ ॥
चित्रं किमेतदिति तां मयि राजन्नुद्यते प्रष्टुम् ।
आदाय मां प्रयाता त्वत्पार्श्वं त्वं त्विमां पृच्छ ॥ २४० ॥
अथ सा नृपेण पृष्टा संबुद्धयन्तैः पदैर्नृपतिम् ।
विस्मृतनिजरूपं तं निजरूपं स्मारयामास ॥ २४१ ॥
भगवंश्चन्द्रापीड त्रैलोक्यानन्द रोहिणीकान्त ।
कादम्बरीहृदब्जाह्लादैनं ते सखायमवगच्छ ॥ २४२ ॥
आशापमोक्षमेनं धारय बद्ध्वा यथानुतापः स्यात् ।
इत्यादिशत्पितास्य श्रीर्माताहं सकाशमनयं ते ॥ २४३ ॥
शापावसानसमयः संप्रति भवतोस्तनू निन्द्ये ।
त्यक्त्वानुभूयतां तत्सुखमभिलषितं चिराद्युवयोः ॥ २४४ ॥

उक्त्वा तिरोदधे सा स्मृत्वा कादम्बरीं नृपः सपदि ।
तद्विरहानलतप्तो लक्ष्योऽभूत्पञ्चबाणस्य ॥ २४५ ॥
ज्ञात्वा तथाविधं तं स्वतनुं विजहौ शुको निन्द्याम् ।
दृष्ट्वाश्चर्यं सर्वे चित्रन्यस्ता इवाभूवन् ॥ २४६ ॥
अथ माधवे निशायां देवी कादम्बरी निजं कान्तम् ।
भूषितमम्बररत्नैः कामार्तालिङ्गयद्गूढम् ॥ २४७ ॥
आलिङ्गितस्तयासौ संज्ञां प्राप्यातिहर्षेण ।
तामालिलिङ्ग दोर्भ्यां कोऽप्यभवद्वै तयोर्मोदः ॥ २४८ ॥
अथ भीतामालक्ष्य प्राहैनां स स्वरेण दीर्घेण ।
भीरु परित्यज्य भयं विहर मया सार्धमाकल्पम् ॥ २४९ ॥
उक्तं मया पुरस्तादविनाश्येतद्वपुर्विशेषेण ।
कादम्बरीकरतलस्पर्शात्कण्ठग्रहाच्च बुद्धोऽस्मि ॥ २५० ॥
शापान्मर्त्यशरीरं यदवाप्तं तन्मया त्यक्तम् ।
त्वत्प्रीत्या वपुरेतच्चान्द्रे लोकेऽपि धारयाम्येव ॥ २५१ ॥
सख्याः पतिर्मदीये लोके ते पुण्डरीकोऽस्ति ।
संगंस्यते क्षणेन त्वमुना चासौ महाश्वेता ॥ २५२ ॥
अत्रान्तरे नभस्तः कण्ठेनैकावलीं बिभ्रत् ।
सखिकरमवलम्ब्यागात्क्षामो विरहात्स पुण्डरीकोऽपि ॥२५३॥
दृष्ट्वा वर्धयितुं सा जगाम देवी महाश्वेताम् ।
जग्राहैनं कण्ठे चन्द्रापीडः सखायं स्वम् ॥ २५४ ॥
जामातासि मदीयो यद्यपि चैतद्वपुर्योगात् ।
सखिभावेन मयि त्वं वर्तस्वाकल्पमित्यवादीत्तम् ॥ २५५ ॥
केयूरकोऽप्यगच्छच्चित्ररथं चापि हंसमाख्यातुम् ।
तारापीडं चागान्मदलेखा वर्धयितुमेवम् ॥ २५६ ॥
उज्जीवितः सुतस्ते साकं तेनापि मन्त्रितनयेन ।
श्रुत्वा गिरं नृपोऽभूदानन्दाब्धौ निमग्नतनुरेव ॥ २५७ ॥

क्कासाविति च सभार्यः प्रोच्याथो मन्त्रिणा सार्धम् ।
तनयप्रत्युज्जीवनहर्षस्याभूद्धि भाजनं सद्यः ॥ २५८ ॥
दृष्ट्वा चन्द्रापीडः पितरं पादौ ववन्देऽस्य ।
मातुः सचिवस्यैवं कृत्वा नीचैरुपाविशद्भूमौ ॥ २५९ ॥
प्रोक्तः पित्रा मे त्वं यद्यपि तनयोऽद्यकालीनः ।
जाने चन्द्रमसं त्वां वन्द्यं सर्वैस्ततोऽसि मे वन्द्यः ॥ २६० ॥
अथ मात्रा वात्सल्यात्प्रस्नुतकुचया परिष्वक्तः ।
मन्त्रिणमाह स देहे जाताशङ्कं निजस्य तनयस्य ॥ २६१ ॥
वैशम्पायन एष प्रणमति मन्त्रिन्गृहाण तनयं त्वम् ।
इति निर्दिष्टं सचिवं प्राह स किंचित्कपिञ्जलो वृत्तम्॥२६२॥
आह भवन्तं भगवान्मुनिवर्यः श्वेतकेतुरिदम् ।
यद्यप्ययं मम सुतः शापविमुक्तो मया ग्राह्यः ॥ २६३ ॥
मत्तेजोऽत्रास्थाप्य ब्राह्मे लोके मया गन्तुम् ।
प्रक्रान्तं तदयं ते तनयोऽविनयात्त्वया रक्ष्यः ॥ २६४ ॥
अथ पुण्डरीकमग्रे कण्ठे जग्राह मन्त्रिवर्योऽसौ ।
अभवत्स्नेहोऽप्युभयोः पूर्वादधिकोऽपि मायया शंभोः ॥२६५
दृष्ट्वैव पुण्डरीकं मुदिता साभून्महाश्वेता ।
लज्जाविनम्रवदनामङ्के कृत्वाप तोषं सः ॥ २६६ ॥
जामातृदर्शनात्तावास्तां मुदितौ च चित्ररथहंसौ ।
नीत्वा पुरं वधूभ्यां सार्धं स्वं राज्यमेतयोर्दत्तम् ॥ २६७ ॥
वाञ्छितमन्वभवद्वै कादम्बर्यास्ततः सुखं रत्याः ।
लेभे चन्द्रापीडो व्रीडानीवीनिवारितकराग्रम् ॥ २६८ ॥
जातस्तम्भस्वेदं गद्गदकण्ठं सरोमाञ्चम् ।
अर्धोन्मीलितनेत्रं संभूतालिङ्गनानन्दम् ॥ २६९ ॥
प्राप्ताधरामृतरसं सकुचामर्दं समणितं च ।
स्वानुभववेद्यतोषं मनसा वचसा निरूपणानर्हम् ॥ २७० ॥

एवं स पुण्डरीको रेमे हंस्यापि लब्धया सुचिरम् ।
अभवत्प्रीतिश्च तयोरनिशं चक्राह्वयोः सदृशी ॥ २७१ ॥
अथ सा चन्द्रापीडं देवी कादम्बरी प्राह ।
देव क्व पत्रलेखेत्यवदत्तामेष सदृत्तम् ॥ २७२ ॥
सा रोहिणी तु शतं मां ज्ञात्वा मर्त्यलोकेऽभूत् ।
सेवायै मम विरतावैच्छद्भवितुं पुनर्मर्त्ये ॥ २७३ ॥
विनिवारिता मया सा मल्लोके द्रक्ष्यसि त्वं ताम् ।
अयमथवा मल्लोकस्त्वद्वाञ्छाधीन एवास्ते ॥ २७४ ॥
स्थित्वा गन्धर्वपुरे कतिपयरात्रं, पितुर्निकटे ।
आगत्य, राजकं तच्चक्रे भूत्या समं स्वस्य ॥ २७५ ॥
निक्षिप्य राज्यभारं सख्यौ रेमे सह प्रियया ।
राजप्रीत्यावन्त्यां चान्द्रे लोके च रोहिणीप्रीत्या ॥ २७६ ॥
कादम्बर्यनुरोधाद्रेमे गन्धर्वनगरे च ।
लक्ष्मीनिवाससरसि सख्युः प्रीत्या प्रतोषमभजत्सः ॥ २७७ ॥
कादम्बरी च देवो हंसी सा पुण्डरीकोऽपि ।
अवियोगे प्रापुस्ते परमां कोटिं प्रमोदस्य ॥ २७८ ॥
इत्थं त्वभिनवपूर्वा पिङ्गलकुलजेन धुण्डिराजेन ।
कादम्बरी विरचिता विदुषां प्रीत्यै सदा भूयात् ॥ २७९ ॥

इति श्रीपिङ्गलकुलजधुण्डिराजकवि-
विरचिताभिनवकादम्बरी
संपूर्णा ।

टिप्पणी ।

१ बाणकवेर्गो बाणभट्टविरचितकादम्बरीम् । गोरूपामित्यर्थः । गौर्वाणी, पक्षे धेनुः ॥ दोग्धुम् । 'दुह'धातोर्द्विकर्मकत्वं प्रसिद्धम् ॥

२ विदिशा वेत्रवतीतटे विद्यमाना पुरी ॥ उपाहरदुपदात्वेन ददौ ॥ कीरं शुकम् ॥ मतङ्गकन्या चाण्डाली ॥

३ सः शुकः ॥ अनया वक्ष्यमाणया 'स्तन–' इति ४ संख्यया ॥

४ स्तनयुगेति । मूलग्रन्थादुद्धृतेयमार्या ॥

५ जगौ बभाषे ॥

६ मृगयुर्व्याधः ॥ उद्देशं देशम् । प्रदेशं भागमित्यर्थः ॥

७ साकं सह । 'साकं सत्रा समं सह' इत्यमरः ॥ दैवतो भाग्यवशात् ॥

९ अवन्तिपुरमुज्जयिनी ॥

१० स्वप्ने । 'जागृति–स्वप्न–सुषुप्ति' इत्यवस्थात्रयम् । जाग्रदवस्था तु विदितैव । सुषुप्त्यवस्थायां ज्ञानाभावः । जाग्रदवस्थायां यद्दृष्टं यच्छ्रुतं तज्जनितवासनया यः प्रपञ्चो यस्यामवस्थायां प्रतीयते सा स्वप्नावस्था । तस्यामित्यर्थः ॥ विशन्तं प्रविशन्तम् ॥ उद्बुद्धः प्रबुद्धः, जागृतः ॥ सुमतिं शोभनमतिम् ॥

११ पुण्डरीकं कमलम् ॥

१२ अप्रतिमं दीप्तिमन्तम् ॥ श्लाघ्यं स्तुत्यम् ॥

१३ चन्द्रापीडः । स्वप्ने भार्यामुखे चन्द्रप्रवेशस्य दृष्टत्वाच्चन्द्रापीड इति पित्रा तन्नामकरणं कृतमित्यर्थः ॥ ईर्ष्यां स्तुत्याम् ॥

१४ आजन्मतः । जन्मारभ्य । जन्मप्रभृतीति यावत् ॥ सांनिध्यौ निकटे ॥ रेमे । 'रमु क्रीडायाम्' लिट्लकारः ॥

१५ शैशव एव बाल्यावस्थायामेव ॥ सविद्यानाम् । कलानामित्यस्य विशेषणम् । षोडशे वर्षे चन्द्रापीडः सर्वशास्त्रार्थतत्त्वज्ञः, सर्वभाषासु सत्कविः, सर्ववादेषु वक्ता, सर्वशास्त्रेषु कोविदः, कलाप्रौढः, एवमभवत् ॥

१६ भाजनं पात्रम् । 'पात्रामत्रं च भाजनम्' इत्यमरः ॥

१७ चक्रे । राज्ञा असौ चन्द्रापीड इति शेषः ॥

१८ अपरा पश्चिमा ॥ कौबेरी उत्तरा ॥

१९ किंनरमिथुनं देवयोनिविशेषः । किंनर्या सह किंनरमित्यर्थः ॥

२० सरः कासारः । 'कासारः सरसी सरः' इत्यमरः ॥ अच्छोदम् । अच्छं स्वच्छं उदकं यस्य तत् । अच्छोदनाम्ना सुप्रसिद्धम् । उदकशब्दस्य उदादेशः ॥

२१ दर्शनमात्रात् । केवलं दर्शनादेवेत्यर्थः ॥

२२ तत्प्रभवं गीतध्वन्युत्पत्तिस्थानम् ॥ जिज्ञासुर्ज्ञातुमिच्छुः ॥ अद्राक्षीदपश्यत् । दृशेर्लुङ् ॥ शून्यममानुषम् । निर्मानुषमिति यावत् ॥ सिद्धालयं महादेवस्थानम् ॥

२३ ललनां स्त्रियम् ॥ लुलोके । 'लोकृ दर्शने' इत्यस्य लिटो रूपम् ॥ अतिविस्मित आश्चर्ययुतः ॥

२४ हारिणा रम्येण । गीतेनेति योज्यम् ॥ कृष्टस्वान्तराकृष्टमनाः । 'स्वान्तं हृन्मानसं मनः' इत्यमरः ॥ अवसानं विरामः, समाप्तिकालः ॥

२५ पीयूषममृतम् ॥

२६ स्वागतम्, आश्रममेहि, त्वं मे पूज्योऽतिथिः प्राप्तः, इति भिन्नं वाक्यत्रयम् ॥

२७ सुकेशी । शोभनाः केशाः यस्याः सा ॥ कस्मात्कुतः ॥

२८ अत्रास्मिन्विषये ॥ सुदती । शोभना दन्ता यस्याः सा ॥

२९ द्युसदां कतमत्कुलमार्यया जनुषाङ्कीकृतमित्यन्वीयते ॥

३० प्रथमे वयसि । वयसस्त्रयो विभागाः । बाल्यावस्था, यौवनावस्था, वृद्धावस्था च । तत्र बाल्यावस्थायाम् ॥ तपस्यभूः । तपसि अभूरिति च्छेदः ॥ निदानमादिकारणम् । मत्संदर्शनेन कदाचित्स्वर्गे गच्छेत्, वा मौनमवलम्बेत, उताहो अन्तर्धानं गच्छेदिति मनसि कृत्वा स्तम्भाच्छादितशरीरः विचारितवान् ॥

३२ उपाहरददद्दात् ॥

३३ अयि कोमलामन्त्रणे ॥

३४ अप्सरसां चतुर्दश वंशाः सुप्रसिद्धाः । ते यथा—'सोमामृतसमीरार्कदक्षकन्यादिसंभवाः' । तत्र दक्षोद्भवं कुलद्वयम् । तत्र दक्षस्य

द्वे कन्ये । मुनिररिष्टेति ।

३७ एका अद्वितीया ॥

३८ शैशवम् । सुखमित्यनेनान्वीयते ॥ अभ्यागाम् । अम्बया सहिता अच्छोदसरसि स्नातुमागताहमित्यर्थः ॥

३९ सलीलम् । लीलया सहितं यथा तथा ॥

४० युवानम् । मुनितनयमित्यस्य विशेषणम् । यौवनावस्थापन्नमित्यर्थः ॥ तस्य श्रुतौ कर्णे तां मञ्जरीं च अहमपश्यमिति पूर्वार्धेनान्वयः । किंभूता मञ्जरी । यद्गन्धाकृष्टेति ।

४१ इयम् । कस्य तरोरियं मञ्जरी अनेन कर्णे निहिता इत्यर्थः ॥

४२ श्वेतकेतुः ऋषिविशेषः ॥

४४ नन्दनमया नन्दनवनलक्ष्म्या ॥

४५ सा । नन्दनमा इत्यर्थः ॥

४६ छद्म कपटम् ॥

४७ अनङ्गो मदनः ॥

४९ मातृनियोगादिति पूर्वेणान्वीयते ॥

५२ लेखः पत्रिका ॥ सख्या एकाकिन्यै । सख्यै एकाकिन्यै इति च्छेदः ॥

५९ तूर्णं झटिति, शीघ्रम् ॥

६७ दिव्यगिरा अशरीरवाण्या ॥

६९ चित्रं चरित्रम्, कथाम् ॥

७९ सा तरलिका ॥ तां कादम्बरीम् ॥

८१ याते । सतिसप्तमीयम् । याते सति ॥

८६ हंसी महाश्वेता ॥

८७ समर्हय पूजय ॥

९० मान्मथो मदनविकारः । मन्मथस्यायं मान्मथः ॥

९२ ईक्षया दर्शनेन ॥

९४ अद्य अस्मिन्नहनि ॥

९५ सव्रीडम् । क्रियाविशेषणम् ॥

९७ सात्त्विकभावाः 'स्तम्भः प्रलयरोमाञ्चौ स्वेदो वैवर्ण्यवेपथू । अश्रु

वैस्वर्यमित्यर्थः' ॥

९८ जिगमिषुर्गन्तुमिच्छुः ॥

१०२ अनुरूपम् । रूपस्य योग्यमित्यर्थः । अव्ययीभावसमासोऽयम् ॥

१०३ उदधिः समुद्रः ॥

१०८ विवशां विचेष्टाम् । निश्चलामित्यर्थः ॥

११८ सश्लेषम् । क्रियाविशेषणम् ॥

११९ काम् अरतिम्, कामरतिमिति च योज्यम् ॥

१२० कौमारं भावं बालभावम्, पक्षे कुमारविषयकमनुरागम् ॥

१२४ निवेशसमकालमिति 'नियुज्य'पदेन संयोज्यम् ॥

१२७ त्वदायत्ताः । त्वदधीना इत्यर्थः ॥

१३० दोर्भ्यां बाहुभ्याम् । 'भुजबाहू प्रवेष्टो दोः' इत्यमरः ॥

१३१ यद्ववान्कुशलमपृच्छत्ततस्याः कुशलमेव ॥ संदिष्टं कथितम् ॥

१३६ किं व्यपदिश्य कं व्यपदेशं कृत्वा ॥

१३८ किंवदन्ती जनश्रुतिः ॥

१४२ सख्युर्दर्शनार्थं पितरं विज्ञाप्येत्यन्वयः ॥ अतर्कितः सहसैव ॥

१५० अस्य चन्द्रापीडस्य ॥ सः वैशम्पायनः ॥

१५३ अचिरादल्पकालेन ॥

१६३ निशीथसमयेऽर्धरात्रसमये ॥

१६९ नष्टसंज्ञस्य मूर्च्छामोहयुतस्य ॥

१७१ दर्शनमिषतो दर्शनच्छलेन ॥ धृताकल्पा परिहितभूषणा ॥

१७४ चैत्ररथी । चित्ररथस्यापत्यं स्त्री इयम् ॥

१७६ पित्रोर्वाञ्छा जिजीविषोर्जनस्य भवति । अहं तु न जिजीविषामि ॥

१८४ इन्द्रायुधमेतन्नामानमश्वम् ॥

१८८ व्यतिकरः संबन्धः ॥

१९८ जगुः शशंसुः ॥

१९९ अत्रान्तरेऽस्मिन्नवसरे ॥

२०६ अम्ब । अम्बाशब्दस्य अम्बेति संबुद्ध्यन्तं पदम् । अम्बावाचकानां शब्दानां संबुद्धौ ह्रस्वो भवति । 'अम्बार्थनद्योर्ह्रस्वः' ॥

२०८ परिचर्या सेवा, उपासना ॥

२०९ आक्षेपम् । आक्षिप्यते मनोऽनेनेति ॥ वेगः प्रवाह ओघो वा ॥
२१० सोऽयं पुण्डरीकः ॥
२२० विमुखे विधौ पराङ्मुखे दैवे सति ॥
२२६ अन्त्यजं नीचजात्युत्पन्नम् ॥
२२८ श्रुतिपथं यापिता कर्णपरम्परया श्रावितां ॥
२२९ मे मया ॥
२३२ दिवौंकीर्तिश्चाण्डालः ॥
२३६ नात्स्यस्ति । न अत्सि अस्ति इति च्छेदः ॥
२३७ विचिकित्सा संशयः ॥
२३८ विमुखः पराङ्मुखः ॥
२३९ प्रत्यूषेऽहर्मुखे ॥
२४१ निजरूपं जन्मान्तरप्राप्तरूपम् ॥
२४२ अवगच्छ जानीहि ॥
२४५ लक्ष्योऽभूदित्यस्याभिप्रायः पञ्चत्वमुपागमदित्येव । यतः यल्लक्ष्यं भवति तद्विद्धं सत् प्राणाञ्जहात्येव ॥ पञ्चबाणो मदनः ॥
२४९ भीरु संबुद्धिः ॥ आकल्पं कल्पसमाप्तिपर्यन्तम् ॥ मया सह विहर विहारं क्रीडां कुर्वित्यर्थः ॥
२५१ चान्द्रे लोकेऽपि धारयामि । इह तु धृतमेव । चान्द्रः । चन्द्रस्यायम् । लोकास्तु बहवः सन्ति, तन्मध्ये विद्यमाने चान्द्रे लोके इत्यर्थः ॥
२५७ उज्जीवितो जीवितापन्नः, प्राप्तजीवितः, आपन्नजीवः ॥
२५९ ववन्दे । 'वदि अभिवादनस्तुत्योः' लिट्लकारः । आत्मनेपदम् ॥ नीचैः कृत्वा अभिवाद्य ॥
२६० अद्यकालीनः अद्यकाले भवः ॥ जाने जानामि ॥
२६१ प्रस्नुतकुचया प्रस्नुतौ कुचौ यस्याः सा ईदृश्या मात्रा ॥ परिष्वक्त आलिङ्गितः ॥
२६२ अनेन प्रकारेण निर्दिष्टो यः सचिवस्तम् ॥
२६४ ब्राह्मे । ब्रह्मणोऽयं ब्राह्मस्तस्मिन् ब्राह्मे लोके । ब्रह्मलोक इत्यर्थः ॥
२६६ आप प्राप ॥
२६७ मुदितौ हर्षितौ ॥ राज्यं राज्ञः कर्म ॥

२६९ गद्गदकण्ठं सद्गदितकण्ठम् ॥

२७१ सुचिरं बहुकालम् ॥ अनिशमनवरतम् । निरन्तरमित्यर्थः ॥

२७३ शप्तं शापयुक्तम् ॥

२७७ लक्ष्मीनिवाससरसि । अच्छोदसरसीत्यर्थः ॥ अभजत् । 'भज सेवायाम्' । लङ्लकारः ॥

२७८ परमामुत्तमाम् ॥

२७९ पिङ्गलकुलं प्राकृते 'पिंगळे' इति प्रसिद्धम् । संस्कृतं तु विनाज्ञेयं सुधीभिरुपबृंहितम् ॥